# લક્ષ્મી નૃસિંહ કરાવલંબ સ્તોત્રમ

શ્રીમત્પયોનિધિનિકેતન ચક્રપાણે ભોગીંદ્રભોગમણિરાજિત પુણ્યમૂર્તે ।
યોગીશ શાશ્વત શરણ્ય ભવાબ્ધિપોત લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 1 ॥

બ્રહ્મેંદ્રરુદ્રમરુદર્કકિરીટકોટિ સંઘટ્ટિતાંઘ્રિકમલામલકાંતિકાંત ।
લક્ષ્મીલસત્કુચસરોરુહરાજહંસ લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 2 ॥

સંસારદાવદહનાકરભીકરોરુ-જ્વાલાવળીભિરતિદગ્ધતનૂરુહસ્ય ।
ત્વત્પાદપદ્મસરસીરુહમાગતસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 3 ॥

સંસારજાલપતિતતસ્ય જગન્નિવાસ સર્વેંદ્રિયાર્થ બડિશાગ્ર ઝષોપમસ્ય ।
પ્રોત્કંપિત પ્રચુરતાલુક મસ્તકસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 4 ॥

સંસારકૂમપતિઘોરમગાધમૂલં સંપ્રાપ્ય દુઃખશતસર્પસમાકુલસ્ય ।
દીનસ્ય દેવ કૃપયા પદમાગતસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 5 ॥

સંસારભીકરકરીંદ્રકરાભિઘાત નિષ્પીડ્યમાનવપુષઃ સકલાર્તિનાશ ।
પ્રાણપ્રયાણભવભીતિસમાકુલસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 6 ॥

સંસારસર્પવિષદિગ્ધમહોગ્રતીવ્ર દંષ્ટ્રાગ્રકોટિપરિદષ્ટવિનષ્ટમૂર્તેઃ ।
નાગારિવાહન સુધાબ્ધિનિવાસ શૌરે લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 7 ॥

સંસારવૃક્ષબીજમનંતકર્મ-શાખાયુતં કરણપત્રમનંગપુષ્પમ ।
આરુહ્ય દુઃખફલિતઃ ચકિતઃ દયાળો લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 8 ॥

સંસારસાગરવિશાલકરાળકાળ નક્રગ્રહગ્રસિતનિગ્રહવિગ્રહસ્ય ।
વ્યગ્રસ્ય રાગનિચયોર્મિનિપીડિતસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 9 ॥

સંસારસાગરનિમજ્જનમુહ્યમાનં દીનં વિલોકય વિભો કરુણાનિધે મામ ।
પ્રહ્લાદખેદપરિહારપરાવતાર લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 10 ॥

સંસારઘોરગહને ચરતો મુરારે મારોગ્રભીકરમૃગપ્રચુરાર્દિતસ્ય ।
આર્તસ્ય મત્સરનિદાઘસુદુઃખિતસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 11 ॥

બદ્ધ્વા ગલે યમભટા બહુ તર્જયંત કર્ષંતિ યત્ર ભવપાશશતૈર્યુતં મામ ।

એકાકિનં પરવશં ચકિતં દયાળો લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 12 ॥

લક્ષ્મીપતે કમલનાભ સુરેશ વિષ્ણો યજ્ઞેશ યજ્ઞ મધુસૂદન વિશ્વરૂપ ।
બ્રહ્મણ્ય કેશવ જનાર્દન વાસુદેવ લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 13 ॥

એકેન ચક્રમપરેણ કરેણ શંખ-મન્યેન સિંધુતનયામવલંબ્ય તિષ્ઠન ।
વામેતરેણ વરદાભયપદ્મચિહ્નં લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 14 ॥

અંધસ્ય મે હૃતવિવેકમહાધનસ્ય ચોરૈર્મહાબલિભિરિંદ્રિયનામધેયૈઃ ।
મોહાંધકારકુહરે વિનિપાતિતસ્ય લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 15 ॥

પ્રહ્લાદનારદપરાશરપુંડરીક-વ્યાસાદિભાગવતપુંગવહૃન્નિવાસ ।
ભક્તાનુરક્તપરિપાલનપારિજાત લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલંબમ ॥ 16 ॥

લક્ષ્મીનૃસિંહચરણાબ્જમધુવ્રતેન સ્તોત્રં કૃતં શુભકરં ભુવિ શંકરેણ ।
યે તત્પઠંતિ મનુજા હરિભક્તિયુક્તા-સ્તે યાંતિ તત્પદસરોજમખંડરૂપમ ॥ 17 ॥

www.yousigma.com